# आदर्श प्रश्नपत्र/ Model Question Paper

## वेदभूषण प्रथम-वर्ष / Vedabhushan First Year

## वर्ष / Year 2022-23

## विषय - संस्कृत

**वस्तुनिष्ठप्रश्नाः** 1 × 10 = 10

1. "धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः" अयं श्लोकांशः कुत्रोद्घोषितः ?

क) वेदे | ख) गीतायाम्

ग) रामायणे | घ) अमरकोषे

2. अमरकोषस्य रचयिता कोऽस्ति ?

क) अमरसिंहः | ख) नारायणः

ग) विक्रमसिंहः | घ) पतञ्जलिः

3. भानुशब्दस्य प्रथमाविभक्तिबहुवचने रूपं भवति -

क) भानुवः | ख) भानुनि

ग) भानवः | घ) भान्वः

4. "लभेते" इत्यस्य पदस्य धातुलकारपुरुषवचनं सत्यमस्ति।

क) लभ् धातु – लट्लकारः, प्रथमपुरुषः, एकवचनम्

ख) लभ् धातु – लट्लकारः, प्रथमपुरुषः, द्विवचनम्

ग) लभ् धातु – लट्लकारः, प्रथमपुरुषः, बहुवचनम्

घ) लभ् धातु – लृट्लकारः, प्रथमपुरुषः, एकवचनम्

5. पितृशब्दस्य द्वितीयाविभक्तौ इमानि रूपाणि भवन्ति।

क) पिता पितरौ पितरः | ख) पिता पितारौ पितरम्

ग) पितरम् पितरौ पितॄन् | घ) पिता पितरौ पितारम्

6. माहेश्वरसूत्रे यण्-प्रत्याहारे अधोलिखितेषु के वर्णाः अन्तर्भवन्ति ?

क) घ-ढ-ध-ष् | ख) च-फ-छ-ठ

ग) य-व-र-ल् | घ) ज-ब-ग-ड-द

7. ए ओ ऐ औ एते वर्णाः कस्मिन् प्रत्याहारेऽन्तर्भवन्ति ?

क) अण् ख) एङ्

ग) इक् घ) एच्

8. जनाः काभिः जलविहारं कुर्वन्ति ?

क) स्वयमेव ख) नौकाभिः

ग) वायुयाने घ) काष्ठेन

9. माहेश्वरसूत्राणां सङ्ख्या कति ?

क) 12 ख) 13

ग) 14 घ) 16

10. "उद्यमेन हि सिध्यन्ति" इत्यग्रे किमस्ति ?

क) कार्याणि न मनोरथैः ख) न हि पुस्तस्य सिंहस्य

ग) प्रविशन्ति मुखे मृगाः घ) किमपि न

**रिक्तस्थानानां पूर्तिः करणीया –** $1 \times 10 = 10$

11. महाभाष्यकारः .................. अस्ति। (वररुचिः/पतञ्जलिः)
12. .................. बालिका। (एषः/एषा)
13. सप्त .................. सन्ति। (गजौ/अश्वाः)
14. दशरथस्य .................. भार्याः। (द्वे/तिस्रः)
15. त्वं ..................। (पश्यति/पश्यसि)
16. तुल्यास्य प्रयत्नं ..................। (सवर्णम्/असवर्णम्)
17. विद्या + आलयः .................. । (विद्यलयः/विद्यालयः)
18. एते + अपि .................. । (एतेपि/एतेऽपि)
19. वेदाः .................. सन्ति। (चत्वारः/पञ्च)
20. यजुर्वेदे .................. अध्यायाः सन्ति। (40/30)

**समुचितशब्दमेलनं कुरुत -** $2 \times 05 = 10$

| | | |
|---|---|---|
| 21. | एकः | वेदाः |
| 22. | एका | बालकौ |
| 23. | द्वौ | पुस्तकम् |
| 24. | चत्वारः | बालिका |
| 25. | एकम् | सभागारः |

**सत्यम्/असत्यम् इति चिनुत -** $2 \times 05 = 10$

26. संस्कृतभाषायां सप्तपुरुषाः भवन्ति।
27. गीतायाम् अष्टादश (18) अध्यायाः सन्ति।
28. पठेत् पठेताम् पठेरन्।
29. लता लते लताः।
30. द्विमात्रो भवेद् ह्रस्वः।

**अतिलघूत्तरीयाः सर्वे प्रश्नाः समाधेयाः -** $2 \times 10 = 20$

31. माहेश्वरसूत्राणि कति सन्ति ?
32. अथर्ववेदस्य कति काण्डानि सन्ति ?
33. वकारस्य उच्चारणस्थानं किम् ?
34. 11.30 इति समयं संस्कृतभाषया लिखत ?
35. अद्य सोमवासरः, श्वः कः वासरः ?
36. कति ऋतवः भवन्ति ?
37. रामायणस्य रचयिता कः ?
38. "वेदानाम्" इत्यत्र का विभक्तिः ?
39. संस्कृतभाषायां कति लिङ्गानि सन्ति ?
40. बालकाय, लता, रमया, पितरौ एतेषां शब्दानां लिङ्ग-विभक्ति-वचनानि लिखत ?

**लघुत्तरीया प्रश्नाः -** 3 × 05 = 15

41. भू धातोः लृट्लकारस्य रूपाणि लिखत ।

42. 10 तः 16 पर्यन्तं सङ्ख्याः संस्कृतभाषया लिखत ।

43. कति वचनानि, कानि च तानि ?

44. "अष्टाध्यायी" इत्यस्य रचयिता कः तथा अष्टाध्याय्यां कति अध्यायाः सन्ति ?

45. "अच्" प्रत्याहारे के के वर्णाः भवन्ति, लिखत ?

**दीर्घोत्तरीयाः प्रश्नाः -** 5 × 05 = 25

46. चतुर्दशमाहेश्वरसूत्राणि लिखत ।

47. पठ् धातोः लट्-लङ्-लकारयोः रूपाणि लिखत ।

48. मातृशब्दस्य सप्तसु विभक्तिषु, त्रिषु वचनेषु रूपाणि लिखत ।

49. कति लकाराः भवन्ति ? तेषां नामानि च लिखत ।

50. "मम विद्यालयः" इति विषयम् आधारीकृत्य पञ्च वाक्यानि लिखत ।